आचार्यदेवश्रीमद्विजयकमलसूरिजैनग्रन्थमाला-ग्रन्थाङ्क-१२.

श्रीसिद्धसेनाचार्यविरचितम्

# श्रीनमस्कारमाहात्म्यम् ।

सम्पादक—मुनि कान्तिविजय

प्रकाशक—पत्तनस्थकेसरबाईज्ञानमन्दिरसंस्थापक-

श्रेष्ठि नगीनदास करमचन्द संघवी

विक्रम सं. २००४ प्रतयः ५०० वीर सं. २४७४

मूल्यम् ०-१०-०

प्राप्तिस्थान—
श्रीकेसरबाईज्ञानमन्दिर
C/o नगीनभाई हॉल,
पाटण [ उ० गूजरात. ]

मुद्रक—
शाह गुलाबचंद लल्लुभाई
श्रीमहोदयप्रीन्टींगप्रेस
दाणापीठ—भावनगर.

जिणसासणस्स सारो चउदसपुव्वाण जो समुद्धारो ।
जस्स मणे नवकारो संसारो तस्स किं कुणइ ॥ १ ॥

## शुद्धिपत्रकम्

पहेला पृष्ठनी फूटनोटमां *जन्ममरणदानत इत्यर्थः । आटलुं वधारवुं अने बीजा पृष्ठनी फूटनोटमांथी ते लीटी रद करवी.

| पृष्ठ. | श्लोक. | अशुद्ध. | शुद्ध. |
|---|---|---|---|
| ३ | ४ | ०र्कि, | ०क्ति, |
| ४ | ७ | ०ध्नस० | ०न्धस० |
| १३ | फूटनोटमां | ०न्या चैते | ०न्या, चैते |
| १५ | ८ | निन्धन | निन्धेन |

# प्रकाशकीय-निवेदन ।



श्रीसिद्धसेनाचार्यविरचित 'श्रीनमस्कारमाहात्म्य' नामनो आ ग्रन्थ, आचार्य-श्रीमद् विजयकमलसूरीश्वरजीजैन-ग्रन्थमालाना बारमा ग्रन्थाङ्क तरीके श्रीकेसरबाईज्ञानमन्दिर तरफथी सम्पादित करावी समाज समक्ष रजू करतां अमने अतिशय आनन्द थाय छे. आ ग्रन्थ अगाउ एक वार छपाई गयेल छे, परन्तु हालमां तेनी नकलो दुष्प्राप्य छे. आथी पू० मुनिराज श्रीमद्भद्रङ्करविजयजीमहाराजनी सूचनाथी आ ग्रन्थनी अति उपयोगिता लागवाथी तेनुं पुनः सम्पादन पूज्यपाद परमगुरुदेव सिद्धान्तमहोदधि आचार्यदेव श्रीमद् विजयप्रेमसूरीश्वरजी महाराजनी अध्यक्षतामां अत्र चातुर्मास विराजमान पू० मुनिराज श्रीकान्तिविजयजीमहाराजद्वारा चार हस्तलिखितप्रतिओना आधारे अमोए करावेल छे. सम्पादनसम्बन्धी विगत तेओश्रीए सम्पादकीय-वक्तव्यमां लखी छे. तथा आ ज ग्रन्थनो गूर्जरभाषामां सुन्दर भावानुवाद तेओश्रीए करी आपेल छे. ते पण मूल सहित पुस्तिकाकारे अमारा तरफथी ताजेतरमां ज बहार पडवानो छे. जिज्ञासुओने ते ग्रन्थ पण साथे राखवा भलामण छे.

वि० सं० २००४,<br>
पोष कृष्ण पञ्चमी.

संघवी नगीनदास करमचंद,<br>
पाटणस्थ श्रीकेसरबाई ज्ञानमन्दिरना संस्थापक.

# सम्पादकीय-वक्तव्य ।

श्रीनमस्कारमाहात्म्य ग्रन्थ के जेनुं मुद्रण अगाउ एक वार वि. सं. १९६८मां पंडित हीरालाल हंसराज तरफथी थई गयेल छे, तेनुं ज पुनर्मुद्रण श्रीकेसरबाई ज्ञानमन्दिरना संस्थापक संघवी नगीनदास करमचंद तरफथी मुनिराज श्रीभद्रङ्करविजयजी म.ना सदुपदेशथी कराववामां आव्युं छे.

**प्रतिओनो परिचय**–आ ग्रन्थना सम्पादनमां चार हस्तलिखित प्रतिओनो उपयोग कर्यो छे, अने मुद्रित प्रतिनो प्रेस कॉपी तरीके उपयोग कर्यो छे.

१–२–३ क० ख० ग० संज्ञासूचित त्रण प्रतिओ पाटणस्थ श्रीहेमचन्द्राचार्य ज्ञानमन्दिरनी छे.

१ क० प्रतिनो तत्रत्य नं. ४९०० छे, अने तेना पत्रो ५ छे. आ प्रति पंदरमी सदीमां लखायेली हशे. शुद्धतानी दृष्टिए आ प्रति वधु उपयोगी नीवडी छे. आथी मुख्य आधार तेनो ज राख्यो छे. आम छतां य जे स्थलोए आ प्रतिस्थ पाठ सर्वथा अशुद्ध जणायो छे त्यां शुद्ध जणायेली अन्य प्रतिना पाठने मुख्य स्थान आप्युं छे, अने आ प्रति प्राचीन होवाना कारणे अशुद्ध जणाता एवा पण तेना पाठने रद नहि करतां फूटनोटमां पाठान्तर तरीके मूकेल छे.

२ ख० प्रतिनो तत्रत्य नं. ५१८५ छे, अने तेना पत्रो १७ छे. आ प्रति १८मी सदीमां लखाएली हशे. शुद्धतानी दृष्टिए आ प्रति पण लगभग क० प्रति जेवी ज छे.

३ ग० प्रतिनो तत्रत्य नं. ७३७९ छे, अने तेना पत्रो ७ छे. आ प्रति २०मी सदीमां लखायेली छे, अने तेमां शुद्धिनुं धोरण जोइए तेवुं सचवायुं नथी.

४ घ० संज्ञासूचित प्रति अमदावादना डहेलाना उपाश्रयनी छे, अने तेना पत्र ५ छे. आ प्रति कममां कम ३०० वर्ष पहेलानी हशे. शुद्धिनुं धोरण आ प्रतिमां जोइए तेवुं सचवायुं नथी, छतां य कोई कोई स्थळे अन्य प्रतिस्थ अशुद्ध-पाठना परिमार्जनमां आ प्रति मार्गदर्शिका बनी छे.

५ हि० संज्ञासूचित प्रति हीरालाल हंसराजद्वारा मुद्रित थयेल प्रति छे. एमां अनेक स्थळे अशुद्धिओ रही गयेली छे. आथी जे स्थलोए चारे हस्तलिखित प्रतिओथी तेना पाठो विरुद्ध जणावा साथे असङ्गत जणाया छे, तेने पाठान्तर तरीके पण नोंध्या नथी.

ग्रन्थ–परिचय—आ ग्रन्थना श्लोक २१८ छे, अने तेना आठ प्रकाश पाडवामां आवेला छे. प्रथमना पांच प्रकाशमां क्रमशः १ अरिहंत, २ सिद्ध, ३ आचार्य, ४ उपाध्याय अने ५ साधु ए पांच परमेष्ठिनुं वर्णन नवकारना पदोना प्रत्येक अक्षरने अनुलक्षीने खूबज आकर्षक रीते करवामां आव्युं छे. छट्ठा प्रकाशमां नवकारनी चूलिकाना चार पदनुं रोचकशैलिथी विस्तृत वर्णन करवामां आव्युं छे. सातमा प्रकाशमां चार निक्षेपामां रहेला सर्वक्षेत्र अने सर्वकालना अरिहंतोना शरणनी प्रार्थना करी, अरिहंतनी वाणी अने मूर्त्तिनो लाभ नहि लेनाराने चोंकावनारी पण प्रेमभरी सूचना द्वारा उपालम्भ आपी अनेक दृष्टान्तो रजू करी कर्ताए अरिहंत परमात्मा उपरनी भक्तिनी रेलमछेल करी दीधी छे.

आठमा प्रकाशमां अरिहंत आदि पांचे परमेष्ठिओनुं संक्षेपथी फरीने वर्णन करेल छे. यद्यपि प्रथमना पांच प्रकाशमां पण अरिहंत आदिनुं ज वर्णन छे अने आठमा प्रकाशमां पण एज वर्णन छे, तो तेमां फरक शुं ? आ शंका सहेजे थई जाय, पण तेनुं समाधान ए छे के बन्ने प्रकाशनी शैली भिन्न छे. प्रथमना पांच प्रकाशमां ग्रन्थकारे पांच पदना पांत्रीस अक्षरोने अनुलक्षीने ज वर्णन कर्युं छे अने ते पण विस्तारथी. ज्यारे आठमा प्रकाशमां अरिहंत, सिद्ध, आचार्य, उपाध्याय, साधु अने केवलिप्रणीतधर्मना शरणनी प्रार्थना करी जिनागम अने जिनवाणीनो महिमा संक्षेपमां वर्णव्यो छे. प्रान्ते नमस्कारनुं ध्यान करनारने केवां अनुपम फलो मळे छे तेनुं वर्णन करी छेल्ला श्लोकमां कर्ताए रचना–स्थल अने पोताना नामनो निर्देश कर्यो छे.

**ग्रन्थकार परिचय**–आ ग्रन्थना रचयिता श्री**सिद्धसेनाचार्य** छे, एनो निर्णय तो प्रथम प्रकाशना बीजा श्लोकना '**सिद्धसेनाधिनाथाय**' आ उल्लेखथी, अगियारमा श्लोकना '**सिद्धसेनसरस्वती**' आ उल्लेखथी अने आठमा प्रकाशना छेल्ला श्लोकना '**सिद्धसेनसरस्वत्या**' आ उल्लेखथी थई जाय छे, परंतु तेओश्रीनी सत्तासदी, गुरुपरम्परा, गच्छ-परम्परा, विहारभूमि अने ग्रन्थरचना आदिनो निर्णय करवा माटे आ ग्रन्थनी चारे हस्तलिखित प्रतिओमांथी कांई पण साधन अमने प्राप्त थयुं नथी. आथी ए नामना थई गयेला सूरिवरोना आजना उपलब्ध साधनो उपरथी मात्र नामो ज जणावुं छुं, अने जणावेला नामो पैकी कया आचार्यदेवनी आ कृति छे एनो निर्णय करी जणाववा इतिहासज्ञोने विनन्ति करूं छुं.

१ श्रीसन्मत्यादिग्रन्थना कर्ता तार्किकशिरोमणि श्रीसिद्धसेनदिवाकरसूरि ।
२ तत्त्वार्थशास्त्रना टीकाकार दिन्नगणिशिष्यसिंहसूरिशिष्यभास्वामिशिष्यश्रीसिद्धसेनसूरि ।
३ जीतकल्पचूर्णिना कर्ता श्रीसिद्धसेनसूरि ।
४ वादिकुञ्जरकेसरीत्यादिबिरुदभृत् श्रीबप्पभट्टिसूरिगुरुश्रीसिद्धसेनसूरि ।
५ बप्पभट्टिसूरिसन्तानीययशोभद्रसूरिगच्छभूषणयशोदेवसूरिशिष्य सं. ११२३ वर्षे विलासवईकहासूत्रधार 'साहारण' इति अपरनामक श्रीसिद्धसेनसूरि ।
६ सं. ११४२ वर्षे प्रवचनसारोद्धारबृहद्वृत्तिकार श्रीसिद्धसेनसूरि ।
७ सं. ११९२ वर्षे बृहत्क्षेत्रसमासटीकाकार उपकेशगच्छीय देवगुप्तसूरिशिष्यश्रीसिद्धसेनसूरि ।
८ श्रीसिद्धिसागरसूरिसन्तानीयश्रीसिद्धसेनसूरि सं. १२९४ ।
९ श्रीनाणकीयगच्छालङ्कार श्रीसिद्धसेनसूरि सं. १४३३ ।
१० नाणावालगच्छीय श्रीशान्तिसूरिसन्तानीयश्रीसिद्धसेणसूरि सं. १५९२ ।

उपर्युक्त सूरिवरोथी प्रस्तुत ग्रन्थना कर्ता श्रीसिद्धसेनसूरि अन्य छे के तेओ पैकी ज कोई छे, ए कांई पण निर्णय थई शके तेवुं साधन अमने मल्युं नथी, छतां आ ग्रन्थना अन्तिम श्लोक—

"सिद्धसेनसरस्वत्या सरस्वत्यापगातटे । श्रीसिद्धचक्रमाहात्म्यं गीतं श्रीसिद्धपत्तने" ॥ प्र० ८ श्लो० १६ ॥

उपरथी एटलुं तो नक्की थई शके छे के सिद्धपुर वस्या पछी थई गयेला श्रीसिद्धसेनसूरिजीनी ज आ कृति छे.

ऋण-स्वीकार– आ ग्रन्थना सम्पादन माटे तैयार करेली प्रेसकॉपी पू. मुनिराज श्रीमनकविजयजी म०जे जोई आपी योग्य सूचना करी छे, पू० पा० उपाध्यायजी श्रीमद् जशविजयजी म.ना शिष्य मुनि श्रीअशोकविजयजीए प्रूफो जोवामां सहाय करी छे, श्रीहेमचन्द्राचार्य ज्ञानमन्दिरना ट्रस्टी नगरशेठ केशवलालभाई तथा वकील चीमनलाल संघवीए त्रण ह० लि० प्रतिओ आपवानी उदारता बतावी छे अने हीराचंद रतनचंदनी पेढीना मालीक शाह साराभाई जेशींगभाईए डहेलाना उपाश्रयनी प्रति मेळवी आपी छे. आथी ते सर्वनो आ स्थळे आभार मानी कृतज्ञता अनुभवुं छुं.

उपसंहार– प्रान्ते एक विज्ञप्ति करी विरमुं छुं के–दृष्टिदोषथी, असावधानीथी, मतिमान्द्यथी के प्रेसदोषथी जे कोई क्षतिओ रही गई होय तेने सुज्ञ महाशयो क्षम्य गणशे अने अनुकूळताए अमने जणाववा कृपा करशे, जेथी हवे पछीनी आवृत्ति प्रसिद्ध थाय त्यारे तेमां यथायोग्य सुधारो थई शके.

नगीनभाई हॉल, पाटण, पोष कृष्ण पञ्चमी.
विक्रम सं. २००४, वीर संवत् २४७४.

मुनि कान्तिविजय,
नगीनभाई हॉल, पाटण.

श्रीसिद्धसेनाचार्यविरचितम्[१]

# श्रीनमस्कारमाहात्म्यम् ।

## प्रथमः प्रकाशः ।

नमोऽस्तु गुरवे कल्प-तरवे जगतामपि । वृषभस्वामिने मुक्ति-मृगनेत्रैककामिने ॥ १ ॥
तपोज्ञानधनेशाय, महेन्द्रप्रणतांह्रये । सिद्धसेनाधिनाथाय, श्रीशान्तिस्वामिने नमः ॥ २ ॥
नमोऽस्तु श्रीसुव्रताया-ऽनन्तायाऽरिष्टनेमिने । श्रीमत्पार्श्वाय वीराय, सर्वार्हद्भ्यो नमो नमः ॥ ३ ॥
देव्योऽच्छुप्ताऽम्बिकाब्राह्मी-पद्मावत्यङ्गिरादयः । मातरो मे प्रयच्छन्तु, पुरुषार्थपरम्पराम् ॥ ४ ॥
जीयात् पुण्याङ्गजननी, पालनी शोधनी च मे । हंसविश्रामकमल-श्रीः सदेष्टनमस्कृतिः ॥ ५ ॥
कटुकोऽप्येष संसारो, जन्मसंस्थितिदानतः । सान्यो मे यन्मया लेभे, जिनाज्ञाऽस्यैव संश्रयात् ॥ ६ ॥

---

१ ०नेमये ख० घ० । २ ०प्रत्य० ग० घ० हि० ।

भवतु नमोऽर्हत्सिद्धा–चार्योपाध्यायसर्वसाधुभ्यः । श्रीजिनशासनमनुज–क्षेत्रान्तःपञ्चमेरुभ्यः ॥ ७ ॥

ये नमो अरिहन्ताणं, नमो सिद्धाणमित्यथ । नमो आयरियाणं चो–वज्झायाणं नमोऽग्रगम् ॥ ८ ॥

नमो लोए सव्वसाहू–णमेवं पदपञ्चकम् । स्मरन्ति भावतो भव्याः, कुतस्तेषां भवभ्रमः ? ॥ ९ ॥

वर्णाः सन्तु श्रिये पञ्च–परमेष्ठिनमस्कृतेः । पञ्चत्रिंशज्जिनवचो–ऽतिशया इव रूपिणः ॥ १० ॥

तेषामनाद्यनन्तानां, श्लोकैस्त्रैलोक्यपावनैः । वितनोत्यात्मनः शुद्धिं, सिद्धसेनसरस्वती ॥ ११ ॥

नरनाथा वशे तेषां, नतास्तेभ्यः सुरेश्वराः । न ते बिभ्यति नागेभ्यो, येऽर्हन्तं शरणं श्रिताः ॥ १२ ॥

मोहस्तं प्रति न द्रोही, मोदते स निरन्तरम् । मोक्षं यमी सोऽचिरेण, भव्यो योऽर्हन्तमर्हति ॥ १३ ॥

अर्हन्ति यं केवलिनः, प्रादक्षिण्येन कर्मणा । अनन्तगुणरूपस्य, माहात्म्यं तस्य वेद कः ? ॥ १४ ॥

रिपवो रा[2]गरोषाद्याः, जिनेनैकेन ते हताः । लोकेशकेशवेशाद्याः, निबिडं यैर्विडम्बिताः ॥ १५ ॥

हंसवत् श्लिष्टयोः क्षीर—नीरयोर्जीवकर्मणोः । विवेचनं यः कुरुते, स ए[3]को भगवान् जिनः ॥ १६ ॥

'स्मृ'-'ध्यै'प्रभृतियुग्धातु–वर्णवत् सहजस्थितिः । कर्मात्मश्लेषो ह्यन्येषां, दुर्लक्ष्यो महतामपि ॥ १७ ॥

हन्तात्मकर्मणोर्बीजा—ऽङ्कुरवत् कु[4]क्कुटाण्डवत् । मिथः संहतयोः पूर्वा–पर्यं नास्त्येव स[5]र्वथा ॥ १८ ॥

---

* जन्ममरणदानत इत्यर्थः । १ ०हूण–मित्येवं क० । २ रागदोषाद्याः, हि० । ३ एव भ० क० । ४ कुर्कटा० ग० कुर्कुटा० हि० । ५ नान्यथा क० ख० ग० हि० ।

तायिनः कर्मपाशेभ्यः, तारका मज्जतां भवे । तात्त्विकानामधीशा ये, तान् जिनान् प्रणिदध्महे ॥ १९ ॥
'णं'-कारोऽयं दिशत्येवं, त्रिरेखः शून्यचूलिकः । तत्त्वत्रयपवित्रात्मा, लभते पदमव्ययम् ॥ २० ॥
सशिरस्त्रिसरलरेखं, खचूलमित्यक्षरं सदा ब्रूते । भवति त्रिशुद्धिसरलः, त्रिभुवनमुकुटस्त्रिकालेऽपि ॥ २१ ॥
सप्तक्षेत्रीव सफला, सप्तक्षेत्रीव शाश्वती । सप्ताक्षरीयं प्रथमा, सप्त हन्तु भयानि मे ॥ २२ ॥

इति श्रीसिद्धसेनाचार्यविरचिते श्रीनमस्कारमाहात्म्ये प्रथमः प्रकाशः समाप्तः

## द्वितीयः प्रकाशः ।

न जातिर्न मृतिस्तत्र, न भयं न पराभवः । न जातु क्लेशलेशोऽपि, यत्र सिद्धाः प्रतिष्ठिताः ॥ १ ॥
मोचास्तम्भ इवासारः, संसारः क्वैष सर्वथा । क्व च लोकाग्रगं लोके, सारत्वात्सिद्धवैभवम् [1] ॥ २ ॥
सितधर्माः सितलेश्याः, सितध्यानाः सिताश्रयाः । सितश्लोकाश्च ये लोके, सिद्धास्ते सन्तु सिद्धये ॥ ३ ॥
सतां स्वर्मोक्षयोर्दाने, धाने दुर्गतिपाततः । मन्येऽहं युगपच्छक्तिं, सिद्धानां द्वितिवर्णतः ॥ ४ ॥
यदि वा
'द्धा'वर्णे सिद्धशब्देऽत्र, संयोगो वर्णयोर्द्वयोः । सकर्णोऽयं सकर्णानां, फलं वक्तीवं योगजम् [2] ॥ ५ ॥

१ लोक-सा० ख० ग० घ० हि० । २ ०ति यो० क० ख० ग० हि० ।

परस्परं कोऽपि योगः, क्रियाज्ञानविशेषयोः । स्त्रीपुंसयोरिवानन्दं, प्रसूते परमात्मजम् ॥ ६ ॥
मान्द्यं पङ्ग्वन्धरूपमं पुंसां, व्यवसायोऽन्नसन्निभः । यथा सिद्धिस्तयोर्योगे, तथा ज्ञानचरित्रयोः ॥ ७ ॥
खड्गखेटकवद् ज्ञान-चारित्रद्वितयं वहन् । वीरो दर्शनसन्नाहः, कलेः पारं प्रयाति वै ॥ ८ ॥
नयतोऽभीप्सितं स्थाने, प्राणिनं सत्तपःश्रमौ । समं निश्चलविस्तारी, पक्षाविव विहङ्गमम् ॥ ९ ॥
मुक्तौ धूर्याविवोत्सर्गा-पवादौ वृषभावुभौ । शीलाङ्गरथमारूढं, क्षणात् प्रापयतः शिवम् ॥ १० ॥
निश्चयव्यवहारौ द्वौ, सूर्याचन्द्रमसाविव । इहामुत्र दिवारात्रौ, सदोद्योताय जाग्रतः ॥ ११ ॥
अन्तस्तत्त्वं मनःशुद्धिः, बहिस्तत्त्वं च संयमः । कैवल्यं द्वयसंयोगे, तस्माद् द्वितयभाग् भव ॥ १२ ॥
नैकचक्रो रथो याति, नैकपक्षो विहङ्गमः । नैवमेकान्तमार्गस्थो, नरो निर्वाणमृच्छति ॥ १३ ॥
दशकान्तर्नवास्तित्व-न्यायादेकान्तमप्यहो । अनेकान्तसमुद्रेऽस्ति[2], प्रलीनं सिन्धुपूरवत् ॥ १४ ॥
एकान्ते तु न लीयन्ते, तुच्छेऽनेकान्तसम्पदः । न दरिद्रगृहे मान्ति, सार्वभौमसमृद्धयः ॥ १५ ॥
एकान्ताभासो यः क्वापि[3], सोऽनेकान्तप्रसत्तिजः । वर्तितैलादिसामग्री-जन्मानं पश्य दीपकम् ॥ १६ ॥
सत्त्वासत्त्वनित्यानित्व-धर्माधर्मादयो गुणाः । एवं द्वये द्वये श्लिष्टाः, सतां सिद्धिप्रदर्शिनः ॥ १७ ॥
तदेकान्तग्रहावेश-मष्टधीगुणमन्त्रतः । मुक्त्वा यतध्वं तत्त्वाय, सिद्धये यदि कामना ॥ १८ ॥

१ प्राणिनः ग० । २ ०पि, ग० हि० । ३ कोऽपि क० । ४ सिद्धत्वे य० ख० म० घ० हि० ।

‘ णं ’-कारोऽत्र दिशत्येवं, त्रिरेखः शून्यमालितः । रत्नत्रयमयो ह्यात्मा, याति शून्यस्वभावताम् ॥ १९ ॥
शुभाशुभैः परिक्षीणैः, कर्मभिः केवलस्य या । चिद्रूपतात्मनः सिद्धौ[1], सा हि शून्यस्वभावता ॥ २० ॥
पञ्चविग्रहसंहन्त्री, पञ्चमीगतिदर्शिनी । रक्ष्यात् पञ्चाक्षरीयं वः, पञ्चत्वादिप्रपञ्चतः ॥ २१ ॥

इति द्वितीयः प्रकाशः समाप्तः ।

## तृतीयः प्रकाशः ।

न तमो न रजस्तेषु, न च सत्त्वं बहिर्मुखम् । न मनोवाग्वपुःकष्टं, यैराचार्याङ्घ्रयः श्रिताः ॥ १ ॥
मोहपाशैर्महाचित्रं, मोटितानपि जन्मिनः । मोचयत्येव भगवान्, आचार्यः केशिदेववत् ॥ २ ॥
आचारा यत्र रुचिराः, आगमाः शिवसङ्गमाः । आयोपाया गतापायाः, आचार्यं तं विदुर्बुधाः ॥ ३ ॥
यथास्थितार्थप्रथको, यतमानो यमादिषु । यजमानः स्वात्मयज्ञं, यतीन्द्रो मे सदा गतिः ॥ ४ ॥
रिपौ मित्रे सुखे दुःखे, रिष्टे शिष्टे शिवे भवे । रिक्थे[2] नैःस्व्ये समः सम्यक्, स्वामी संयमिनां मतः ॥ ५ ॥
या काचिदनघा सिद्धिः, या काचिद् लब्धिरुज्ज्वला । वृणुते सा स्वयं सूरिं, भ्रमरीव सरोरुहम् ॥ ६ ॥

---

१ शुद्धौ प्र० । २ रैक्थ्ये नैः० हि० ।

'णं'-कारोऽत्र दिशत्येवं, त्रिरेखो व्योमचूलिकः । त्रिवर्गसमतायुक्ताः, स्युः शिरोमणयः सताम् ॥ ७ ॥
धर्मार्थकामा यदि वा, मित्रोदासीनशत्रवः । यद्वा रागद्वेषमोहाः, त्रिवर्गः समुदाहृतः ॥ ८ ॥
*सप्ततत्त्वाम्बुजवनी-सप्तसप्तिविभानिभा । सप्ताक्षरी तृतीयेयं, सप्तावनितमो ह्रियात् ॥ ९ ॥

इति तृतीयः प्रकाशः समाप्तः ।

## चतुर्थः प्रकाशः ।

न खण्ड्यते कुपाखण्डैः, न त्रिदण्ड्या विडम्ब्यते । न दण्ड्यते चण्डिमाद्यैः, उपाध्यायं श्रयन् सुधीः ॥ १ ॥
[3]मोमाश्रीह्रीधृतिब्राह्म्यो, मोच्चलन्तु तदङ्गतः । [4]उपास्ते य उपाध्यायं, सिद्धादेशो महानिति ॥ २ ॥
उदयो मूर्तिमान् सम्यग्-दृष्टीनामुत्सवो धियाम् । उत्तमानां य उत्साहः, उपाध्यायः स उच्यते ॥ ३ ॥
वचो वपुर्वयो वंक्षो, वर्जितं वधवार्त्तया । वशगं वेदविद्यानां, उपाध्यायमहेशितुः ॥ ४ ॥
ज्झाकारो वाचकश्लोक-मम्भाया व्यानशे दिशः । अनित्यैकान्तदृग्नित्यै-कान्तदृग्जयजन्मनः ॥ ५ ॥

* सप्ततत्त्वरूपकमलवनविकासने सूर्यकिरणसदृशी इत्यर्थः । १ ०जननी-क० ख० घ० । २ ०ध्यायान् श्र० क० । ३ सोमा० ग० ह्रि०, मा+उमा=मोमा० । ४ उपाध्यास्त उपा० क० । ५ वक्ष्यो, घ० ०वृद्धं, ह्रि० । ६ ०यं महस्व तम् ह्रि० ।

या सप्तनयवैदग्धी, या परागमचातुरी । या द्वादशाङ्गी–सूत्राप्तिः, सोपाध्यायाद्दते कुतः ? ॥ ६ ॥
'णं'–कारोऽत्र दिशत्येवं, त्रिरेखोऽम्बरशेखरः । विनयश्रुतशीलाद्याः, महानन्दाय जाग्रति ॥ ७ ॥
सप्तरज्जूर्ध्वलोकाऽध्वो–द्योतदीपमहोज्ज्वला । सप्ताक्षरी चतुर्थी मे, छिद्याद् व्यसनसप्तकम् ॥ ८ ॥

इति चतुर्थः प्रकाशः समाप्तः ।

## पञ्चमः प्रकाशः ।

न व्याधिर्न च दौर्विध्यं, न वियोगः प्रियैः समम् । न दुर्भगत्वं नोद्वेगः, साधूपास्तिकृतां नृणाम् ॥ १ ॥
न चतुर्द्धा दुःखतमो, नराणामान्ध्यहेतवे । साधुध्यानाऽमृतरसा–ऽञ्जनलिप्तमनोदृशाम् ॥ २ ॥
मोक्कारः सर्वसङ्गानां, मोष्या नाऽऽन्तरवैरिणाम् । मोदन्ते मुनयः कामं, मोक्षलक्ष्मीकटाक्षिताः ॥ ३ ॥
लोभद्रुमनदीवेगाः, लोकोत्तरचरित्रिणः । लोकोत्तमास्तृतीयास्ते, लोपं तन्वन्तु पाप्मनाम् ॥ ४ ॥
एकान्ते रमते स्वैरं, मृगेण मनसा समम् । मूलोत्तरगुणग्रामा–ऽऽरामेषु भगवान् मुनिः ॥ ५ ॥
एकत्वं यदिदं साधौ, संविग्ने श्रुतपारगे । तत्साक्षाद् दक्षिणावर्त्ते, शङ्खे सिद्धसरिज्जलम् ॥ ६ ॥
एको न क्रोधविधुरो, नैको मानं तनोति वा । एको न दम्भसंरम्भी, तृष्णा मुष्णाति नैककम् ॥ ७ ॥

एकत्वतत्त्वनिर्व्यूढ-सत्त्वा राजर्षिकुञ्जराः । ययुः प्रत्येकबुद्धाः श्री-नमिप्रभृतयः शिवम्[2] ॥ ८ ॥
सर्वथा ज्ञाततत्त्वानां, सदा संविग्नचेतसाम् । सतामेकाकिता सम्यक्, समतामृतसारणिः ॥ ९ ॥
[3]एवमैदंयुगीनौ तु, द्वौ द्वौ सङ्घाटकस्थितौ । स्वार्थसंसाधकौ स्यातां, व्रतिनौ वशिनौ यदि ॥ १० ॥
[4]एवसंशयेत्यवितर्क्य-मैतिह्यं यद् द्वयोर्द्वयोः । वचोवक्षोवपुर्वृत्त्या, वशिनोर्व्रतिनोः शिवम् ॥ ११ ॥
निःशङ्कमैक्यं जनयोः, वशित्वादुभयोरपि । एकस्यापि सहस्रत्वं, दुरन्तमवशात्मनः ॥ १२ ॥
नेत्रवत्समसङ्कोच-विस्तारस्वप्नजागरौ । द्वौ दर्शनाय कल्पेते, नैकः सम्पूर्णकृत्यकृत् ॥ १३ ॥
एको विडम्बनापात्रं, एकः स्वार्थाय न क्षमः । एकस्य नहि विश्वासो, लोके लोकोत्तरेऽपि वा ॥ १४ ॥
भावनाध्याननिर्णीत-तत्त्वलीनान्तरात्मनः । ऐक्यं न लक्षमध्येऽपि, निर्ममस्य विनश्यति ॥ १५ ॥
साम्यामृतोर्मितृप्तानां, सारासारविवेचिनाम्[5] । साधूनां भावशुद्धानां[6], स्वार्थेऽपि क्वाऽथवा क्षतिः[7] ? ॥ १६ ॥
मनःस्थैर्यान्निश्चलानां, वृक्षादिवदकर्मणाम् । वृन्दमृषीणामेकत्र, भावनावल्लिमण्डपः ॥ १७ ॥
मनसा कर्मणा वाचा, चित्रालिखितसैन्यवत् । मुनीनां निर्विकाराणां, बहुत्वेऽप्यरतिः कुतः ? ॥ १८ ॥
निर्जीवेष्विव चैतन्यं, साहसं कातरेष्विव । बहुष्वपि मुनीन्द्रेषु, कलहो न मनागपि ॥ १९ ॥

---

१ ०सारा रा० ग० हि० । २ समम् क० । ३ सर्वदैवयुगीनौ क० । ४ सर्वज्ञावित्यवितर्क्य०' क० । ५ ०किनाम् हि० । ६ ०सिद्धानां ख० ग० घ० हि० । ७ क्षितिः क० ।

पञ्चभैरपि यो ग्लानिं, मुग्धधीर्गणयिष्यति । एकत्राऽनन्तसिद्धेभ्यः, स कथं स्पृहयिष्यति ? ॥ २० ॥
रागाद्यपायविषमे, सन्मार्गे चरतां सताम् । रत्नत्रयजुषामैक्यं, कुशलाय न जायते ॥ २१ ॥
नैकस्य सुकृतोल्लासो, नैकस्यार्थोऽपि तादृशः । नैकस्य कामसम्प्राप्तिः, नैको मोक्षाय कल्पते ॥ २२ ॥
श्लेष्मणे शर्करादानं, सज्वरे स्निग्धभोजनम् । एकाकित्वमगीतार्थे, यतावञ्चति नौचितीम् ॥ २३ ॥
एकश्चौरायते प्रायः, शङ्क्यते धूर्त्तवद् द्वयम् । त्रयो रक्षन्ति विश्वासं, वृन्दं नरवरायते ॥ २४ ॥
जिनप्रत्येकबुद्धादि-दृष्टान्तान्नैकतां श्रयेत् । न चर्मचक्षुषां युक्तं, स्पर्द्धितुं ज्ञानदृष्टिभिः ॥ २५ ॥
चातुर्गतिकसंसारे, भ्राम्यतां सर्वजन्मिनाम् । पुण्यपापसहायत्वात्, नैकत्वं घटतेऽथवा ॥ २६ ॥
संज्ञाकुलेश्याविकथाः, चर्चिका इव चापलम् । यस्याऽन्तर्धाम कुर्वन्ति, स एकाकी कथं भवेत् ? ॥ २७ ॥
शाकिनीवदविरति-संज्ञा नाट्यप्रिया सदा । ग्रासाय यतते यस्य, स एकाकी कथं भवेत् ? ॥ २८ ॥
पञ्चाग्निवदसन्तुष्टं, यस्येन्द्रियकुटुम्बकम् । देहं दहत्यसन्देहं, स एकाकी कथं भवेत् ? ॥ २९ ॥
दायादा इव दुर्दान्ताः, कषायाः क्षणमप्यहो । यद्विग्रहं न मुञ्चन्ति, कथं तस्यैकतासुखम् ? ॥ ३० ॥
स्वमनोवाक्तनूत्थानाः, कुव्यापाराः कुपुत्रवत् । भ्रंशाय यस्य यस्यन्ति, कथं तस्यैकतासुखम् ? ॥ ३१ ॥
यस्य प्रमादमिथ्यात्व-रागाद्याश्छलवीक्षिणः । कुप्रातिवेश्मिकायन्ते, कथं तस्यैकतासुखम् ? ॥ ३२ ॥

१. ०मेञ्झानार्या प्रिया ख०, ०रथानार्या प्रिया हि० ।

य एभिरुज्झितः सम्यक्, सजनेऽपि स एककः । जनाऽऽपूर्णेऽपि नगरे, यथा वैदेशिकः पुमान् ॥ ३३ ॥
एभिस्तु सहितो योगी, मुधैकाकित्वमश्नुते । वण्ठः शठश्चरश्चौरः, किमु भ्राम्यति नैककः ? ॥ ३४ ॥
क्षीरं क्षीरं नीरं नीरं, दीपो दीपं सुधा सुधाम् । यथा सङ्गत्य लभते, तथैकत्वं मुनिर्मुनिम् ॥ ३५ ॥
पुण्यपापक्षयान्मुक्ते, केवले परमात्मनि । अनाहारतया नित्यं, सत्यमैक्यं प्रतिष्ठितम् ॥ ३६ ॥
यद्वा श्रुतेऽत्र नाऽनुज्ञा, निषेधो वाऽस्ति सर्वथा । सम्यगायव्ययौ ज्ञात्वा, यतन्ते यतिसत्तमाः ॥ ३७ ॥
हूयते न दीयते न, न तप्यते न जप्यते । निष्क्रियैः साधुभिरहो, साध्यते परमं पदम् ॥ ३८ ॥
हूहूगीतैरपि सुधा-रसैर्मन्दारसौरभैः । दिव्यतल्पसुखस्पर्शैः, सुरीरूपैर्न ये हृताः ॥ ३९ ॥
तत् किं ते तरवो यद्वा, शिशवो यदि वा मृगाः । न ते न ते न ते किन्तु, मुनयस्ते निरञ्जनाः ॥ ४० ॥
'णं' कारोऽयं भणत्येवं, त्रिरेखो बिन्दुशेखरः । गुप्तित्रये लब्धरेखाः, सद्वृत्ताः स्युर्महर्षयः ॥ ४१ ॥
नवभेदजीवरक्षा-सुधाकुण्डसमाकृतिः । दत्तां नवाक्षरीयं मे, धर्मे भावं नवं नवम् ॥ ४२ ॥

इति पञ्चमः प्रकाशः समाप्तः ।

## षष्ठः प्रकाशः ।

एष पञ्चनमस्कारः, सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां, मुख्यं भवति मङ्गलम् ॥ १ ॥

१ ०रुच्छ्रितः क० । २ ०त्ववन्नित्यं, ख० ग० घ० हि० ।

समितिप्रयतः सम्यग्, गुप्तित्रयपवित्रितः । अमुं पञ्चनस्कारं, यः स्मरत्युपवैणवम्* ॥ २ ॥
शत्रुर्मित्रायते चित्रं, विषमप्यमृतायते । अशरण्याऽप्यरण्यानी, तस्य वासगृहायते ॥ ३ ॥
ग्रहाः सानुग्रहास्तस्य, तस्कराश्च यशस्कराः । समस्तं दुर्निमित्ताद्यं, अपि स्वस्तिफलेग्रहि ॥ ४ ॥
न मन्त्रतन्त्रयन्त्राद्याः, तं प्रति प्रभविष्णवः । सर्वापि शाकिनी द्रोह-जननी जननीव न ॥ ५ ॥
व्यालास्तस्य मृणालन्ति, गुञ्जापुञ्जन्ति वह्नयः । मृगेन्द्रा मृगधूर्त्तन्ति, मृगन्ति च मतङ्गजाः ॥ ६ ॥
तस्य रक्षोऽपि रक्षायै, भूतवर्गोऽपि भूतये । प्रेतोऽपि प्रीतये प्रायः, चेटत्वायैव चेटकः ॥ ७ ॥
धनाय तस्य प्रधनं, रोगो भोगाय जायते । विपत्तिरपि सम्पत्त्यै, सर्वं दुःखं सुखायते ॥ ८ ॥ [सप्तभिः कुलकम्]
बन्धनैर्मुच्यते सर्वैः, सर्पैश्चन्दनवज्जनः । श्रुत्वा धीरं ध्वनिं पञ्च-नमस्कारगरुत्मतः ॥ ९ ॥
जलस्थलश्मशानाद्रि-दुर्गेष्वन्येष्वपि ध्रुवम् । नमस्कारैकचित्तानां, अपायाः प्रोत्सवा इव ॥ १० ॥
पुण्यानुबन्धिपुण्यो यः, परमेष्ठिनमस्कृतिम् । यथाविधि ध्यायति सः, स्यान्न तिर्यग् न नारकः ॥ ११ ॥
चक्रिविष्णुप्रतिविष्णु-बलाद्यैश्वर्यसम्पदः । नमस्कारप्रभावाब्धेः, तटमुक्तादिसन्निभाः ॥ १२ ॥
वश्यविद्वेषणक्षोभ-स्तम्भमोहादिकर्मसु । यथाविधि प्रयुक्तोऽयं, मन्त्रः सिद्धिं प्रयच्छति ॥ १३ ॥
उच्छेदं परविद्यानां, निमेषार्द्धात् करोत्यसौ । क्षुद्रात्मनां परावृत्ति-वेधं च विधिना स्मृतः ॥ १४ ॥

* उपवैणवं त्रिसन्ध्यं इत्यर्थः ।

भूर्भुवःस्वस्त्रयीरङ्गे, यः कोप्यतिशयः किल । द्रव्यक्षेत्रकालभावा–ऽपेक्षया चित्रकारकः ॥ १५ ॥
कश्चित्कथश्चित्कस्यापि, श्रूयते दृश्यतेऽङ्गिनः । स सर्वोऽपि नमस्कारा-ऽऽराधमाहात्म्यसम्भवः ॥ १६ ॥
तिर्यग्लोके चन्द्रमुख्याः, पाताले चमरादयः । सौधर्मादिषु शक्राद्याः, तदग्रेऽपि च ये सुराः ॥ १७ ॥
तेषां सर्वाः श्रियः पञ्च–परमेष्ठिमरुत्तरोः । अङ्कुरा वा पल्लवा वा, कलिका वा सुमानि वा ॥ १८ ॥
ते गतास्ते गमिष्यन्ति, ते गच्छन्ति परम्पदम् । आरूढा निरपायं ये, नमस्कारमहारथम् ॥ १९ ॥
यदि तावदसौ मन्त्रः, शिवं दत्ते सुदुर्लभम् । ततस्तदनुषङ्गोत्थे, गणना का फलान्तरे ? ॥ २० ॥
जपन्ति ये नमस्कार–लक्षं पूर्णं त्रिशुद्धितः । जिनसंघपूजिभिस्तैः[1], तीर्थकृत्कर्म बध्यते ॥ २१ ॥
किं तपःश्रुतचारित्रैः, चिरमाचरितैरपि । सखे ! यदि नमस्कारे, मनो लेलीयते न ते ? ॥ २२ ॥

योऽसंख्यदुःखक्षयकारणस्मृतिः[2], य ऐहिकामुष्मिकसौख्यकामधुक् ।
यो दुष्षमायामपि कल्पपादपो, मन्त्राधिराजः स कथं न जप्यते ? ॥ २३ ॥

न यद् दीपेन सूर्येण , चन्द्रेणाप्यपरेण वा । तमस्तदपि निर्नाम, स्यान्नमस्कारतेजसा ॥ २४ ॥
कृष्णशाम्बादिवद् भाव–नमस्कारपरो भव । मा वीर-पालक-न्यायात्[3], मुधाऽऽत्मानं विडम्बय ॥ २५ ॥
यथा नक्षत्रमालायां, स्वामी पीयूषदीधितिः । तथा भावनमस्कारः, सर्वस्यां पुण्यसंहतौ ॥ २६ ॥

१ ०पूजितैस्तैः, हि० । २ ०स्मृतौ, हि० । ३. ०न्यावत्, क० हि० ।

जीवेनाकृतकृत्यानि, विना भावनमस्कृतिम् । गृहीतानि विमुक्तानि, द्रव्यलिङ्गान्यनन्तशः ॥ २७ ॥
अष्टावष्टौ शतान्यष्ट, सहस्राण्यष्ट कोटयः । विधिध्याता नमस्काराः, सिद्धयेऽन्तर्भवत्रयम् ॥ २८ ॥
धर्मबान्धव ! निश्छद्म-पुनरुक्तं त्वमर्थ्यसे । संसारार्णवबोहित्थे, माऽत्र मन्त्रे श्लथो भव ॥ २९ ॥
अवश्यं यदसौ भाव-नमस्कारः परं महः । स्वर्गापवर्गसन्मार्गो, दुर्गतिप्रलया[1]निलः ॥ ३० ॥
शिवतातिः सदा सम्यक्, पठितो गुणितः श्रुतः । समनुप्रेक्षितो भव्यैः, विशिष्याराधनाक्षणे ॥ ३१ ॥
प्रदीप्ते भवने यद्वत्, शेषं मुक्त्वा गृही सुधीः । गृह्णात्येकं महारत्नं, आपन्निस्तारणक्षमम् ॥ ३२ ॥
[2]आकालिक-रणोत्पाते, [3]यथा कोऽपि महाभटः । अमोघमस्त्रमादत्ते, सारं दम्भोलिदण्डवत् ॥ ३३ ॥
एवं नाशक्षणे सर्व-श्रुतस्कन्धस्य चिन्तने । प्रायेण न क्षमो जीवः, तस्मात्तद्गतमानसः ॥ ३४ ॥
द्वादशाङ्गोपनिषदं, परमेष्ठिनमस्कृतिम् । धीरधीः सङ्क्लेश्यः, कोऽपि स्मरति सात्त्विकः ॥ ३५ ॥
समुद्रादिव पीयूषं, चन्दनं मलयादिव । नवनीतं यथा दध्नो, वज्रं वा रोहणादिव ॥ ३६ ॥
आगमादुद्धृतं सर्व-सारं कल्याणसेवधिम् । परमेष्ठिनमस्कारं, धन्याः केचिदुपासते ॥ ३७ ॥
संविग्नमानसाः स्पष्ट-गम्भीरमधुरस्वराः । योगमुद्राधरकराः, शुचयः कमलासनाः ॥ ३८ ॥
उच्चरेयुः स्वयं सम्यक्, पूर्णां पञ्चनमस्कृतिम् । उत्सर्गतो विधिरयं, ग्लान्या[4]ऽत्रैते न चेत्क्षमाः ॥ ३९ ॥

१ ०यानलः ख० ग० हि० । २ अका० ख० ग० हि० । ३ यद्वा को० ख० ग० हि० । ४ ०न्या चैते ग० हि० ।

असिआउसेति मन्त्रं, तन्नामाद्यक्षराङ्कितम्[1] । स्मरन्तो जन्तवोऽनन्ताः[2], मुच्यन्तेऽन्तकबन्धनात् ॥ ४० ॥
अर्हदरूपाऽऽचार्योपा-ध्यायमुन्यादिमाक्षरैः । सन्धिप्रयोगसंश्लिष्टैः, ॐकारं वा विदुर्जिनाः ॥ ४१ ॥
व्यक्ता मुक्तात्मनां मुक्तिः[3], मोहस्तम्बेरमाङ्कुशः । प्रणीतः प्रणवः प्राज्ञैः, भवाब्धिच्छेदकर्त्तरी ॥ ४२ ॥
ओमिति ध्यायतां तत्त्वं, स्वर्गार्गलककुञ्चिकाम् । जीविते मरणे वापि, मुक्तिर्मुक्तिर्महात्मनाम् ॥ ४३ ॥
सर्वथाप्यक्षमो दैवात्, यद्वाऽन्ते धर्मबान्धवात् । शृण्वन् मन्त्रममुं चित्ते, धर्मात्मा भावयेदिति ॥ ४४ ॥
अमृतैः किमहं सिक्तः, सर्वाङ्गं यदि वा कृतः । सर्वानन्दमयोऽकाण्डे, केनाऽप्यनघबन्धुना ॥ ४५ ॥
परं पुण्यं परं श्रेयः, परं मङ्गलकारणम् । यदिदानीं श्रावितोऽहं, पञ्चनाथनमस्कृतिम् ॥ ४६ ॥
अहो ! दुर्लभलाभो मे, ममाहो ! प्रियसङ्गमः । अहो ! तत्त्वप्रकाशो मे, सारवृष्टिरहो ! मम ॥ ४७ ॥
अद्य कष्टानि नष्टानि, दुरितं दूरतो ययौ । प्राप्तं पारं भवाम्भोधेः, श्रुत्वा पञ्चनमस्कृतिम् ॥ ४८ ॥
प्रशमो देवगुर्वाज्ञा-पालनं नियमस्तपः । अद्य मे सफलं जज्ञे[4], श्रुतपञ्चनमस्कृतेः ॥ ४९ ॥
स्वर्णस्येवाग्निसम्पातो[5], दिष्ट्या मे विपदप्यभूत् । यल्लेभेऽद्य मयाऽनर्घ्यं[6], परमेष्ठिमयं महः ॥ ५० ॥
एवं शमरसोल्लास-पूर्वं श्रुत्वा नमस्कृतिम् । निहत्य क्लिष्टकर्माणि, सुधीः श्रयति सद्गतिम् ॥ ५१ ॥

---

१ ०द्याक्ष० ख० ग० घ० हि० । २ ०न्तात्, क० घ० । ३ शुक्तिः ख० ग० घ० हि० । ४ जन्म, ख० ग० घ० हि० । ५ ०सन्तापो, ख० हि० । ६ ०हाऽन० ख० ग० हि० ।

उत्पद्योत्तमदेवेषु, विपुलेषु कुलेष्वपि । अन्तर्भवाष्टकं सिद्धः, स्यान्नमस्कारभक्तिभाक् ॥ ५२ ॥

इति षष्ठः प्रकाशः समाप्तः ।

## सप्तमः प्रकाशः ।

सदा नामाकृतिद्रव्य-भावैस्त्रैलोक्यपावनाः । क्षेत्रे काले च सर्वत्र, शरणं मे जिनेश्वराः ॥ १ ॥
तेऽतीताः केवलज्ञानि-प्रमुखा ऋषभादयः । वर्त्तमाना भविष्यन्तः, पद्मनाभादयो जिनाः ॥ २ ॥
सीमन्धराद्या अर्हन्तो, विहरन्तोऽथ शाश्वताः । चन्द्राननवारिषेण-वर्द्धमानर्षभाश्च ते ॥ ३ ॥
संख्यातास्ते वर्त्तमानाः, अनन्तास्तीतभाविनः । सर्वेष्वपि विदेहेषु, भरतैरावतेषु च ॥ ४ ॥

ते केवलज्ञानविकाशभासुराः, निराकृताष्टादशदोषविप्लवाः ।
असंख्यवासवोष्पतिवन्दितांघ्रयः, सत्प्रातिहार्यातिशयैः समाश्रिताः ॥ ५ ॥
जगत्त्रयीकोविदपर्षत्संस्तुत-त्रिंशद्गुणालङ्कृतदेशनागिरः ।
अनुत्तरस्वर्गिगणैः सदा स्मृताः, अमन्यदेयाक्षरमार्गदायिनः ॥ ६ ॥

दुरितं दूरतो याति, साधिव्याधिः प्रणश्यति । दारिद्र्यमुद्रा विद्राति, सम्यग्दृष्टे जिनेश्वरे ॥ ७ ॥
निन्द्यन मांसखण्डेन, किं तया जिह्वया नृणाम् । माहात्म्यं या जिनेन्द्राणां, न स्तवीति क्षणे क्षणे ॥ ८ ॥
अर्हच्चरित्रमाधुर्य-सुधास्वादाऽनभिज्ञयोः । कर्णयोश्छिद्रयोर्वाऽपि, स्वल्पमप्यस्ति नान्तरम् ॥ ९ ॥

सर्वातिशयसम्पन्नां, ये जिनार्चां न पश्यतः । न ते विलोचने किन्तु, वदनालयजालके ॥ १० ॥
अनार्येऽपि वसन् देशे, श्रीमानाऽऽर्द्रकुमारकः । अर्हतः प्रतिमां दृष्ट्वा, जज्ञे संसारपारगः ॥ ११ ॥
जिनबिम्बेक्षणात् ज्ञात-तत्त्वः शय्यम्भवद्विजः । निषेव्य सुगुरोः पादान्, उत्तमार्थमसाधयत् ॥ १२ ॥
अहो ! सात्त्विकमूर्द्धन्यो, वज्रकर्णो महीपतिः । सर्वनाशेऽपि योऽन्यस्मै, न ननाम जिनं विना ॥ १३ ॥
देवतत्त्वे गुरुतत्त्वे, धर्मतत्त्वे स्थिरात्मनः । वालिनो वानरेन्द्रस्य, महनीयमहो महः ॥ १४ ॥
सुलसाया महासत्याः, भूयासमवतारणम्[1] । सम्भावयति कल्याण-वार्त्तायां त्रिजगद्गुरुः[2] ॥ १५ ॥
श्रीवीरं वन्दितुं भावात्, चलितौ दर्दुरावपि । मृत्वा सौधर्मकल्पान्त-र्जातौ शक्रसमौ सुरौ ॥ १६ ॥

हासाप्रहासापतिरामियोग्य-दुष्कर्मनिर्विण्णमनाः सुरोऽपि ।
देवाधिदेवप्रतिमां क्षमायां, प्राकाशयत्स्वात्मविमोचनाय ॥ १७ ॥
जिनांह्रिसेवाहृतपापतापः, त्रैलोक्यकुक्षिम्भरिसत्प्रतापः ।
श्रीचेटको नाम महाक्षमापः, सुरेन्द्रचित्तेष्वपि वासमाप ॥ १८ ॥
अष्टाहिकापर्व सुपर्वनाथाः, कुर्वन्ति सर्वे जिनमन्दिरेषु ।
नित्येषु नन्दीश्वरमुख्यतीर्था-ऽलङ्कारभूतेषु भवाभिभूत्यै ॥ १९ ॥

---

१ भूयाः समवतारणं क०, भूयांसमवधारणं ह्वि०। २ ०वार्त्तया या जगद्गुरुम् क०, ०वार्त्तया यां जगद्गुरुः ख० ।

श्रूयते चरमाम्भोधौ, जिनबिम्बाकृतेस्तिमेः । नमस्कृतिपरो मीनो, जातस्मृतिर्दिवं ययौ ॥ २० ॥
नृसुरासुरसाम्राज्यं, भुज्यते यदशङ्कितम् । जिनपादप्रसादानां, लीलायितलवो हि सः ॥ २१ ॥
नृलोके चक्रवर्त्त्याद्याः, शक्राद्याः सुरसद्मनि । पाताले धरणेन्द्राद्याः, जयन्ति जिनभक्तितः ॥ २२ ॥
मुकुटीकृतजैनाज्ञाः, रुद्रा एकादशाप्यहो ! । केचित्तीर्णास्तरिष्यन्ति, परे संसारसागरम् ॥ २३ ॥
वह्निज्वाला इव जले, विषोर्मय इवामृते । जिनसाम्ये विलीयन्ते, हरादीनां कथाप्रथाः ॥ २४ ॥
तानि जैनेन्द्रवृत्तानि, सम्यग् विमृशतां सताम् । अत्राप्यानन्दमग्नानां, युक्तं मोक्षेऽपि न स्पृहा ॥ २५ ॥
यथा तोयेन शाम्यन्ति, तृषोऽन्नेन क्षुधो यथा । जिनदर्शनमात्रेण, तथैकेन भवार्त्तयः ॥ २६ ॥
अतिकोटिः समाः सम्यक्, समाधीन् समुपासताम् । नार्हदाज्ञां विना यान्ति, तथापि शमिनः शिवम् ॥ २७ ॥
न दानेनाऽनिदानेन, न शीलैः परिशीलितैः । न शस्याभिस्तपस्याभिः, अजैनानां परं पदम् ॥ २८ ॥
भास्वता वासर इव, पूर्णिमेवाऽमृतांशुना । सुभिक्षमिव मेघेन, जिनेनैवाऽव्ययं महः ॥ २९ ॥
अक्षायत्तं यथा द्यूतं, मेघाधीना यथा कृषिः । तथा शिवपुरे वासो, जिनध्यानवशंवदः ॥ ३० ॥
सुलभास्त्रिजगल्लक्ष्म्यः, सुलभाः सिद्धयोऽष्ट ताः । जिनांह्रिनीरजरजः-कणिकास्त्वतिदुर्लभाः ॥ ३१ ॥
अहो ! कष्टमहो ! कष्टं, जिनं प्राप्यापि यज्जनाः । केचिन्मिथ्यादृशो बाढं, दिनेशमिव कौशिकाः ॥ ३२ ॥

---

१ पारेसं० ख० घ० ।

जिन एव महादेवः, स्वयम्भूः पुरुषोत्तमः । परात्मा सुगतोऽलक्ष्यो, भूर्भुवःस्वस्त्रये(यी)श्वरः ॥ ३३ ॥
त्रैगुण्यगोचरा संज्ञा, बुद्धेशानादिषु स्थिता । या लोकोत्तरसत्त्वोत्था, सा सर्वाऽपि परं जिने ॥ ३४ ॥
रोहणाद्रेरिवादाय, जिनेन्द्रात्परमात्मनः । नानाऽभिधानरत्नानि, विदग्धैर्व्यवहारिभिः ॥ ३५ ॥
सुवर्णभूषणान्याऽऽसु, कृत्वा स्वस्वमतेष्वथ । तत्तद्देवेष्वाहितानि, कालात् तन्नामतामगुः ॥ ३६ ॥ युग्मम् ॥
यद्वा—अमृतानि यथाब्दस्य, तडागादिषु पाततः । तज्जन्मानि जनाः प्राहुः, नामान्येवं तथार्हतः ॥ ३७ ॥
लोकाग्रमधिरूढस्य, निलीनानि हरादिषु । तेषां सत्कानि गीयन्ते, लोकैः प्रायो बहिर्मुखैः ॥ ३८ ॥ युग्मम् ॥
किञ्च तान्येव नामानि, विद्धि योगीन्द्रवल्लभम् । यानि लोकोत्तरं सत्त्वं, ख्यापयन्ति प्रमाणतः ॥ ३९ ॥
संज्ञा रजस्तमःसत्त्वा–भासोत्था अतिकोटयः । अनन्ते भववासेऽस्मिन्, मादृशामपि जज्ञिरे ॥ ४० ॥
अपि नाम सहस्रेण, मूढो हृष्टः स्वदैवते । बदरेणापि हि भवेत्, शृगालस्य महो महान् ॥ ४१ ॥
सिद्धानन्तगुणत्वेना–ऽनन्तनाम्नो जिनेशितुः । निर्गुणत्वादनाम्नो वा, नामसंख्यां करोतु कः ? ॥ ४२ ॥
रजस्तमोबहिःसत्त्वा-ऽतीतस्य परमेष्ठिनः । प्रभावेण तमःपङ्के, विश्वमेतन्न मज्जति ॥ ४३ ॥
मन्येऽत्र लोकनाथेन, लोकाग्रं गच्छतार्हता । मुक्तं पापाज्जगत्त्रातुं, पुण्य(ण्यं)वल्लभमप्यहो ! ॥ ४४ ॥
पापं नष्टं भवारण्ये, समितिप्रयतात् प्रभोः । तद्ध्वंसाय ततः पुण्यं, सर्वं सैन्यमिवान्वगात् ॥ ४५ ॥

१ ०स्वःसुरेऽश्वरः ग० हि०, स्वःशिवेश्वरः ख० घ० ।

पुण्यपापविनिर्मुक्तः, तेनासौ भगवान् जिनः । लोकाग्रं सौधमारूढो, रमते मुक्तिकान्तया ॥ ४६ ॥
जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् । जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥ ४७ ॥
इति ध्यानरसावेशात्, तन्मयीभावमीयुषः । परत्रेह च निर्विघ्नं, वृणुते सकलाः श्रियः ॥ ४८ ॥

इति सप्तमः प्रकाशः समाप्तः ।

## अष्टमः प्रकाशः ।

अर्हतामपि मान्यानां, परिक्षीणाष्टकर्मणाम् । सन्तः पञ्चदशभिदां, सिद्धानां न स्मरन्ति के ? ॥ १ ॥
निरञ्जनाश्चिदानन्द–रूपा रूपादिवर्जिताः । स्वभावप्राप्तलोकाग्राः, सिद्धानन्तचतुष्टयाः ॥ २ ॥
साद्यनन्तस्थितिजुषो, गुणैकत्रिंशताऽन्विताः । परमेशाः परात्मानः, सिद्धा मे शरणं सदा ॥ ३ ॥
शरणं मे गणधराः, षट्त्रिंशद्गुणभूषिताः । सर्वसूत्रोपदेष्टारो, वाचकाः शरणं मम ॥ ४ ॥
लीना दशविधे धर्मे, सदा सामायिके स्थिराः । रत्नत्रयधरा धीराः, शरणं मे[1] सुसाधवः ॥ ५ ॥
भवस्थितिध्वंसकृतां, शम्भूनामिव नान्तरम् । सूरिवाचकसाधूनां, तत्त्वतो दृष्टमागमे ॥ ६ ॥
धर्मो मे केवलज्ञानि-प्रणीतः शरणं परम् । चराचरस्य जगतो, य आधारः प्रकीर्त्तितः ॥ ७ ॥
ज्ञानदर्शनचारित्र–त्रयीत्रिपथगोर्मिभिः । भुवनत्रयपावित्र्य-करो धर्मो हिमालयः ॥ ८ ॥

१ मेऽस्तु सा० ख० ग० हि० ।

नानादृष्टान्तहेतूक्ति-विचारभरबन्धुरे । स्याद्वादतत्त्वे लीनोऽहं, भग्नैकान्तमतस्थितौ ॥ ९ ॥
नवतत्त्वसुधाकुण्ड-गर्भो गाम्भीर्यमन्दिरम् । अयं सर्वज्ञसिद्धान्तः, पातालं प्रतिभाति मे ॥ १० ॥
सर्वज्योतिष्मतां मान्यो, मध्यस्थपदमाश्रितः । रत्नाकरावृतोऽनन्ता-ऽऽलोकः श्रीमान् जिनागमः ॥ ११ ॥
स्थानं सुमनसामेकं स्थास्नुर्लोकद्वयोरपि[1] । विनिद्रशाश्वतज्योतिः, भाति गौः परमेष्ठिनः ॥ १२ ॥

श्रीधर्मभूमीश्वरराजधानी, दुष्कर्म-पाथोज-वनी-हिमानी ।
सन्देहसन्दोहलताकृपाणी, श्रेयांसि पुष्णातु जिनेन्द्रवाणी ॥ १३ ॥

एवं नमस्कृतिध्यान-सिन्धुमग्नान्तरात्मनः । आममृत्कुम्भवत् सर्व-कर्मग्रन्थिर्विलीयते ॥ १४ ॥
श्रीह्रीधृतिकीर्त्तिबुद्धि-लक्ष्मीलीलाप्रकाशकः । जीयात् पञ्चनमस्कारः, स्वःसाम्राज्यशिवप्रदः ॥ १५ ॥
सिद्धसेनसरस्वत्या, सरस्वत्यापगातटे । श्रीसिद्धचक्रमाहात्म्यं, गीतं श्रीसिद्धपत्तने ॥ १६ ॥

इति श्रीसिद्धसेनाचार्यविरचिते श्रीनमस्कारमाहात्म्येऽष्टमः प्रकाशः समाप्तः ।

१ ०द्वयोपरि क० ग० घ० हि० ।